श्रीगणेशाय नमः श्रीसरस्वत्यै नमः श्रीभास्कराय नमः श्रीशुक्राय नमः श्रीबृहस्पतये नमः श्रीवेदपुरुषाय नमः

ॐ

# मङ्गलाचरणम्

हरिः ॐ पावका नः सरस्वती वाजेभिर्वाजिनीवती ।

यज्ञं व्वष्टु धियावसुः।।

सरस्वती योन्यां गर्ब्भमन्तरश्विब्भ्यां पत्नी सुकृतं ब्बिभर्त्ति।

अपाᳬं रसेन वरूणो न साम्नेन्द्रᳬं श्रियै जनयन्नप्सु राजा।।

व्विष्णणो रराटमसि व्विष्णोः श्नप्त्रेस्थो व्विष्णणोः स्यूरसि
व्विष्णणोद्ध्रुवोऽसि।।

वैष्णणव मसि विष्णणवे त्त्वा।।

नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः
शिवाय च शिवतराय च।।

आ कृष्णणेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्त्यं च।

हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन्।।

नमो गणेब्भ्यो गणपतिब्भ्यश्च वो नमो नमो व्रातेब्भ्यो

व्व्रातपतिभ्यश्च वो नमो नमो गृत्सेब्भ्यो गृत्सपतिब्भ्यश्च वो नमो नमो
विरूपेब्भ्यो व्विश्वरूपेब्भ्यश्च वो नमो नमः ।।

देवीर्द्वारऽइन्द्रᳬं संङ्घाते व्वीड्वीर्य्यामन्नवर्द्धयन्। आ वत्सेन तरूणेन कुमारेण
च मीवतापार्वाणᳬं रेणुककाट न्नुदन्ता वसुवने वसुधेयस्य व्यन्तु यज।।

卐 卐 卐 卐 卐 卐 卐 卐 卐 卐 卐